International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(3): 01-03
© 2020 IJSR
www.anantaajournal.com
Received: 01-02-2020
Accepted: 05-03-2020

डॉ0 दीपाली जैन
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकॉगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत ।

डॉ0 वीना विश्नोई शर्मा
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकॉगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत ।

Corresponding Author:
डॉ0 दीपाली जैन
कन्यागुरूकुलमहाविद्यालयः,
गुरूकुलकॉगड़ीविश्वविद्यालयः,
हरिद्वाराम्, उत्तराखण्ड, भारत ।

# वैदिकग्रन्थेषु संस्कृतवाङ्मये च कृषिकार्येषु जलप्रबन्धनम्

डॉ0 दीपाली जैन, डॉ0 वीना विश्नोई शर्मा

**सारः**

ज्ञायते यत् पृथिव्यां भूस्तरीयजलस्रोतानां कृषिसिचनकार्येषु आवश्यकताः वर्तते। तत्र नद्यः निर्झराः प्रस्रवणाः जलप्रवाहवत्त्वात्स्रोतांसि भवन्ति। जलाशयाः भूगर्भीयजलेन वर्षाजलेन च सदैव अन्तः प्रवाहवन्तः भवन्ति।वर्षा मृतस्वरूपं नदीजलाशयानां स्थितिः, भूगर्भीयशैलाः इत्यादयः भूमिगतजलस्य दशां निश्चितां कुर्वन्ति। तत् भूमिगतं जलं बहुभिः आधुनिकैः यन्त्रैः निष्काष्य कृषिसिचनकार्ये प्रयुज्यते । भूगर्भे वर्षाजलं भूपृष्ठीयजलं च विविधमार्गेभ्यः भाण्डारी क्रियते। तस्य स्तरे आवर्तपरिवर्तनं भवति। वर्षाकाले भौमजलस्तरम् उच्चतरं भवति, अतः भूगर्भीयजलभण्डारेषु अतिरिक्तजलपूर्तिः जायते। वर्षातिरिक्तऋतिषु लोकैः उपयोगाय संदुह्यमानं भूगर्भीयजलं वर्षाऋतौ पुनः पूर्यते। प्राचीनकालादेव सर्वाधिकं भूमिगतजलमेवोपभुज्ये कृषिसिचनकार्ये च प्रयुज्यते। वर्षाहिमद्रावितजलयोः भूपृष्ठीयजलस्य सन्तुलनं भूमिगतेनैव जलेन क्रियते। असीमितमपि भूगर्भीयजलं पुनःपूरणं (त्मबींतहम) पद्धत्या नैसर्गिकरूपेण अविछिन्नस्रोतस्त्वेन स्वीक्रियते।

मानवैः उपयोगात् विमोचनेन, मलाशयानां, जलप्रस्रवेण, नगरेषु अपवाहकुल्याभिः, मलिनसामग्रीभिः स्थलपूरणेन कृषियोग्यभूमिषु प्रयुज्यमानरासायनिकोर्वकानां अनुप्रयुक्तजलेन प्रदूषितं जलमनेशैलेभ्यः मृल्लवणतां खनिजधातूनां पोषकगुणांश्चाहृत्य जलमपि कृषिसिंचनकार्ये सर्वथा उपयोगी भवति।

प्राचीनकाले कृषिसिंचने विशेषध्यानं दीयते स्म। महाभारते सभापर्वणि राजानं उच्यते यत् सः स्वराज्यस्य विभिन्नभागेषु जलयुक्ताः कूपाः तडागाश्च निर्मीयेत् तथा कृषिः केवलं वर्षाऽऽश्रिता न भवेत्। [2]

**कुंजीशब्दाः** :– पुनःपूरणं, परियोजना, उपकूपः, वापी, कृषि संसाधन, अनर्राष्ट्रीयविशत्परिवहनम्, मरूप्रदेशः, अनूपप्रदेशः।

## प्रस्तावना

वर्तमान समये वैदिककालेच कृषिः मानवानां भोज्यान्नस्यावश्यकतापूर्तेः प्रमुखः साधनम् वर्तते । कृषिः वस्तुतः बहुसाधनापेक्षिसङ्घटकमस्ति । भूमिः वीजानि उपकरणानि जलं श्रम इत्यादयो तस्य घटकाः सन्ति । यद्यपि सर्वेऽपि घटकाः कृषिकार्ये अपरिहार्याः सन्ति तथापि जलमेव तत्र प्रमुखं साधनम् । भूमेः उर्वरत्वं मृदुत्वंच, वीजानामङ्कुरप्रोहः, उपकरणानां संचालनसौविध्यं श्रमस्य चोपलब्धिः जलायत्ता एव । विशेषतः जलस्योपयोगः सेचनार्थं क्रियतेऽत्र ।

संस्कृतसाहित्ये वैदिककालादेव जलस्यापेक्षा स्तुतिश्च सस्योत्यादनाय कृता । सेचनार्थं देवमातृकं वर्षाजलम् अदेवमातृकंच नद्यादिभ्यो गृहीतं जलं प्रयुज्यते । वर्षाजलमपि रूपद्वये कृषिकार्ये सहायकं भवति ।

स्थलीयजले नद्यः सरोवराश्च जलस्य स्थायि–स्रोतांसि भवन्ति। नैसर्गिक–सरोवराणां स्थितिः नदीनां च मार्गः सुनिश्चितो भवति, अतः तेषामुपयोगः तन्निकटस्थकृषिरेव प्रयुज्यते। नद्यादिप्राकृतिकस्रोतभ्यो दूरवर्तिप्रदेशेषु मानवप्रयासैः पुष्करपुष्करिण्यः, तडागाः, कूपाः, वाप्यः, परीवाहाः, कुल्यल्पिकादयश्च खायन्ते। तेषां जलमपि कृषिकार्ये प्रयुज्जते। संस्कृतसाहित्ये पूर्तविधाने तडागादीनां खातविधानं प्रतिष्ठानविधानं (लोकार्पणम्) च विहितम्। [3]

## शोधस्य विधि :–

अत्र प्रस्तुत शोधपत्रे मुख्यतः वैदिक साहित्ये कृषिकार्येषु, कुषिसिंचन व्यवस्था केवलं वर्षाजले एवाश्रिता भवेत् [4]। अत्र प्राथमिक द्वितीयक च स्त्रोतयो समायोजितं कर्तुं शक्यन्ते। यथा कृषिकार्येषु सेचनकार्येषु च जलप्रबन्धनस्य पारम्परिक विधियः प्रासंगिकता निष्कर्षे प्राप्तुम प्रयासास्ति। विभिन्न प्राचीन ग्रन्थेषु कृषिकार्येषु सेचनव्यवस्थाहेतुं जलप्रबन्धनस्य महत्वम् स्थापितुम् प्रकृतेः सम्बन्धमाश्च प्रयत्नाम्चास्ति।

भारतवर्षः कृषिप्रधानदेशोऽस्ति अतः प्राचीनकालादेव क्षेत्रोत्पन्नानां अन्नानां व्यवसायः प्राचीनतमव्यवसायोऽस्ति। प्रचीनकाले यदा नदीतटेषु लोकसंस्कृतेः प्रसारः संजातः तदा कृषिजीविनः कृषिकार्यः प्रथमतया जीविकासाधनरूपेण प्रारब्धवन्तः इत्यनुमीयते।

**विवेचनाः—**

भारतवर्षः कृषिप्रधानदेशोऽस्ति अतः प्राचीनकालादेव क्षेत्रोत्पन्नानां अन्नानां व्यवसायः प्राचीनतमव्यवसायोऽस्ति। प्रचीनकाले यदा नदीतटेषु लोकसंस्कृतेः प्रसारः संजातः तदा कृषिजीविनः कृषिकार्यः प्रथमतया जीविकासाधनरूपेण प्रारब्धवन्तः इत्यनुमीयते।

कृषिकार्ये ऊर्जारूपे जलसंसाधनस्योपयोगः सर्वाधिकं जलमेवास्ति इदानीं सम्पूर्णभारते अन्यान्याः जलविषयिकाः परियोजनाः संचाल्यन्ते । ताः जलयोजनाः निम्नांकिताः सन्ति—

| | | |
|---|---|---|
| 1. | शिवसमुद्रमपरियोजना | कावेरीनद्याम् । |
| 2. | टाटा जलविद्युत्परियोजना | महाराष्ट्रे जलाशयेषु आश्रिता। |
| 3. | पाइकारा जलविद्युत्परियोजना | तमिलनाडौ पाइकारानद्याम्। |
| 4. | शाननविद्युत्परियोजना | हिमाचलप्रदेशे व्याससहायकओहल इत्याख्यनद्याम्। |
| 5. | अपरगंगाजलविद्युत | उत्तरप्रदेशे अपरगंगा कुल्यायाम् ग्रिडप्रक्रमः |
| 6. | भाखडा नांगलपरियोजना | हिमाचलप्रदेश—हरियाणापंजाबप्रदेशेषु व्यासशुतुद्रीनद्योः चतुर्विद्युत्कुन्द्राणि। |
| 7. | दामादरपरियोजना | विहारे दामोदरनद्याम् । |
| 8. | हीराकुण्डपरियोजना | उत्कलप्रदेश महानद्याम्। |
| 9. | रिहन्दपरियोजना | मध्यप्रदेशे राजस्थानयोः चम्बलनद्याम्। |
| 10. | शरावती जलविद्युत्परियोजना | कर्णाटकप्रदेशे जोगाख्यो जलप्रपपाते। |
| 11. | कुण्डापरियोजना | तमिलनाडौ कावेरी नद्याम्। |
| 12. | कोयनापरियोजना | महाराष्ट्रे कोयना नद्याम्। |

एताः सर्वाः परियोजना विशेषरूपेण विद्युत् उत्पादने संलग्नाः तथा च ताभ्यः परियोजनाभ्यः निर्गतजलानि कृषिसेचनकार्ये अति महत्वायोगी वर्तते।

एवं ज्ञायते यत् एतासु परियोजनासु सामान्यमिदं सर्वास्वपि सेतुबन्धेषु जलसंग्रहं कृत्वा प्रथमं तु विद्युतनिर्माणं क्रियते। ततश्च तस्य जलस्य प्रयोगः सुदूरवर्तीकृषिभूमिषु संचनकार्ये प्रयुज्यते ।

सामवेदे कृत्रिमनदीषु जलावरोधे सेतुबन्धोऽवगन्तव्यः।

''**कदावसोस्तोत्रं हर्यत अवश्यमशारूधद्वा।**
**दीर्घं सुतं वाताप्याय ।।**'' [5]

पद्मपुराणे सृष्टिखण्डे आलिकर्मणः उल्लेखः सेतुबन्धार्थे कृतः। स च सेतुः प्रयोजनद्वयं दधाति— अध्वगतानां यात्रिणां नदीतरणे सारल्यं, जलावरोधेन कृषिसेचनश्च। जलसंसाधनस्योपयोगाय आलि—वापी—कूपादीनां निर्माणविधिः तत्र द्रष्टव्या—

> ''**अकरोदालिकं कर्म शिलाबद्धं च मृण्मयम्।**
> **संक्रमं जलदुर्गे च तरणिं च तथापरे।।**
> **वापी कूपतटाकानि प्रपाराममहीरुहम्।**'' [6]
> ''**हायनैकं तृणेनैव शरकाण्डेन तच्छतम्।**
> **अयुतं ह्यन्यकाष्ठेन लक्षं खदिरदारुणा।।**
> **कोटि—कोटि च पाषाणैः सुदृढैर्यत्नसंयुतैः।**
> **तस्मात्सर्वप्रयत्नेन मण्डपं कारयेद् बुधः।।** [7]''

एवमुक्तरीत्या तृणशरकाण्डकाष्ठपाषाणादिभिः दृढं सेतुबन्धं कारयित्वा जनाः कृषिसेचनं कुर्वन्ति स्म।

कौटिल्यः ईखकृषिं कठिनं मन्यते स्म, यतोहि तस्य प्राप्तौ व्ययं अधिकं भवति आपत्तयश्चापि न्यूना न सन्ति। अथर्ववेदे उल्लेखः प्राप्यते यत् तस्मिन् काले ईखकृषिः भवति स्म। [2] शुक्रनीतौ प्राप्यते यत् जलस्य समुचितव्यवस्था नृपाणां परमकर्त्तव्यं आसीत्— यथा— कूपाः,पौढीयुक्तजलाशयाः, तडागाः, झीलजलप्रपातादीनां निर्माणम्। [9]

वैदिकसाहित्ये सिन्धसरस्वत्यौ शुच्यौ आरोग्यदे चोक्ते। पुराणेषु नर्मदागंगयोः सर्वाधिकं माहात्म्यं वर्णितम्।

''**नद्यः निरामया मन्दगा शुक्तिमती इत्यादयः सन्ति सहस्रशः।**
**विश्वस्य मातरः सर्वाः सर्वाश्चैव महाफलाः।।**'' [10]

मेगस्थनीज (मैकरिडिल) इतिग्रन्थस्य कथनमस्ति यत् तस्मिन् काले भारते कृषिसिंचनव्यवस्था आसीत् तथा प्रतिवर्षे वारद्वयं धान्यानि उत्पाद्यन्ते स्म। [11]

इदमेव कथनम् तैत्तिरीयसंहितायामपि उपलभ्यते

''**तस्माद् द्विः संवत्सरस्य सस्यं पच्यते।।**'' [12]

सागरस्तु अक्षया—जलागाराः सन्ति। निकटवर्तिप्रदेशेषु सागरीजलस्य बहुविधाः उपयोगाः क्रियन्ते। सागरैः स्थलीय—जलवायुः विशेषतः कृषि, वनस्पति, मानवानां च कृते अति लाभदायका भवति। वर्षायाः पार्थिवकारणं महासागरा एव। सागरीयतटानां कटिबन्धप्रदेशाः, जलीयधाराः, तरंगाः, बेगाः सागरीयजलस्य शान्तनितलमित्यादीनां कृषितापमान—ऊर्जा—परिवहनादिक्षेत्रेषु महत्त्वपूर्णं स्थानमस्ति। कृषिसिंचनकार्यः मत्स्यव्यवसायः, जलीयजैविक—वैवरासायनिकरत्नव्यवसायः, अन्तर्राष्ट्रीयविशत्परिवहनं चंति प्रमुखतया सागराधीनमेव वर्तते। समुद्रजलानि कृषिकार्ये सेचनकार्येषु च अतिमहत्वपूर्णं वर्तते। एवं समुद्रीयजलस्य उपयोगार्थं संसाधनरूपेण जलसंदोहनं वैयक्ति—राज्य—कुन्द्रस्तरेषु व्यापकस्तरे करणीयं वर्तते। आवश्यकतानुसारेण वर्षाजलस्य साक्षात् संग्रहः भूमिगतजलस्य च निर्जलप्रदेशेषु उत्खननं कृत्वा कृषिसंसाधनरूपेण प्रयुज्यते। सागरीयजलस्याक्षयभाण्डारत्वात् विश्वस्य विभवजलशक्तिः प्रचुरास्ति। ज्ञातव्यं यत् विभवशक्तेः अभिप्रायः संभाव्यमानाः सकला अपि जलपरियोजनाः कृषिसेचने अति सहायिकाः भवन्ति। किन्तु विविधैः कारणैः समस्तजलशक्तेः जलसेचनकर्तुं न शक्यते तथापि जलीयोर्जाया उत्पादनेन जलौघादेः सेचनाद्यर्थंच जलापूर्तिः कर्तुं शक्यते। अनया दृष्ट्या जलसंसाधनस्य बहुक्षेत्रीयोपयोगः कर्तुं शक्यते।

जलसंचयनं सेतुबन्धादिभिः क्रियते स्म। नारदः स्वकीयस्मृतौ द्विविधसेतूनां उल्लेखः कृतवान् खेय—बन्ध्यश्च। खेयः (ते सन्ति ये अतिजलनिष्कासनार्थं भूमिंखनित्वा निर्मीयन्ते स्म), बन्ध्यश्च (बांध, ये जलावरोधनार्थं निर्मीयन्ते)। [13] चेत् सेतुनिर्माणेन एकं क्षेत्रमपेक्षाकृत अतिलाभः भवति तदा तं सेतुं निर्मीयेत्। [14] अस्य निर्माणपूर्वे सेतुनिर्मातां नृपाद् आज्ञा अपेक्षते। न तु निर्माणे तस्मिन् बाधा उत्पद्यते। अनेन प्रकारेण अन्येषां तडागानामपि व्यवस्था भवेत् । [15] एवं प्रकारेण प्राचीनकविभिरनेका सिंचनकार्येसंलग्नानां नदीनां वर्णनं कृतम्। सामान्यतयो सरितो द्वयोर्वर्गयोर्विभज्यन्ते—उत्तरभारतीयाः सरितो दक्षिणभारतीयाश्च सरितः। उत्तरभारतीयस्रोतस्विनीनां प्रभवस्थानानि सामान्यतो

हिमगिरिशृंखलासु वर्तन्ते। हिमस्यात्र सततं द्रवीभान्नैताः सरिता वर्षर्तुमवलम्बन्ते, परं सदानीरा ण्वावलोक्यन्ते। परं वर्षर्तर्नदीश्वत्र प्रभूतानि जलानि वर्धयति। तटानुलंध्य चैताः सुदूरं यावत् प्रसरन्ति।

**निष्कर्षः –**

वैदिककाले सिंचनार्थं वर्षा जलैव जनाः निर्भरासन्। [16] वर्षातिरिक्तं कूप [17], कुल्या [18] पोखर–रहटादिभिश्च [19] सिंचनकार्यं भवति स्म। अथर्ववेदे वर्षायाः कृते पर्जन्यदेवं प्रार्थयते स्म। [20] अथर्ववेदे कुल्या खननस्य उल्लेखोऽस्ति तथा सरितां गौ तथा नवनिर्मितं कुल्यां तस्याः पुत्रं कथ्यते। [21]

मनुः निगदति यत्– कूप, तडाग, बावडीदिकं निर्माणं राज्ञः प्रमुखकर्तव्येषु निहितवान्। [22] बृहस्पतिः नवीनतडाग, बावडी, कूपनिर्माता तथा तडागादीनां जीर्णोद्धारकार्तारं स्वर्गलोकं प्राप्नोति। [23]

रामायणकाले कृषिसिंचनकार्यं मुख्यतः वर्षाजले निर्भरम् आसीत्। यथा वर्षायाः प्रतिक्षा कुर्वन् कृषकसंबोधितानाम् अनेकोपमानाम् उत्प्रेक्षानां च प्रयोगः प्राप्यते। [24] तथापि अनावृष्टि–दुर्भिक्षादीनां रक्षार्थं सिंचनस्य कृत्रिमसाधनानां उपयोगः क्रियते स्म। कोसलराज्ये तडागानां आधिक्यमासीत्। [25] कुल्यानां जलाशयानां कूपानां सेतूनां बन्धानां निर्माणकर्तारं 'यन्त्रकः' [26] इत्युच्यते स्म।तेषां निर्माणकार्यं राज्यतः भवति स्म। कुल्यां (नालीं) प्रणाली तथा बान्धं रोधसःवदन्ति स्म। अयोध्यायाः श्रृंगवेरपुरं यावत् मार्गनिर्माणसमये यंत्रकाः भरतस्य आदेशानुसारं अचिरादेव काले अल्पजलयुक्तजलप्रपातानां जलावरोधनार्थं बांधनिर्मितवन्तः। अनेन ते विविधाकारसम्पन्नाः अगाधजलतडागेषु परिणता अभवन्। [27]

यत्र जलाभावोऽऽसीत् तत्र स अनेकेषां नवकूपतडागानां निर्माणं अकारयत् तथा च तेषु समीपे जनानां विश्रामार्थं चतुःशाला निर्मितवान्। [28] नदीजलसंग्रहार्थं ताः बन्धाभिः अवरोध्यते स्म, यथा विच्छिनबांधसरिता तुल्योपमाभिः सूच्यते स्म। [29] चेत् क्षेत्रेषु कामपि स्थानं शुष्को भवति तथा तं निकषा एव अन्यस्थानं जलपूर्णा भवेत्, तदा पूर्वस्थानसन्निकटताजन्य जलीयता प्रभावेण स्ववनस्पतीन् सिंच्यते स्म। [30] वर्षायां नदीप्रवाहो वृद्धिमागते सति तटवर्तीप्रदेशेषु उर्वरायुक्तं करोति स्म। [31] गोमतीनद्याः पुलिने अनेकानि जलस्थानानि सन्ति, तानि गोयुतानूपान् स्पें प्रयुज्यन्ते स्म। [32] सरयूनदीपुजिने कोसलराज्यधन–धान्येन परिपूर्णोऽऽसीत्। [33]

कृषिकार्येषु प्रमुखतः जलमुपयुज्यते। एतदर्थं संस्कृतसाहित्यं खातानामुल्लेखोऽस्ति तानि खातानि द्विधा जलापूर्तिसाधनं भवन्ति। देवखातकम् खातश्च। [34] देवखातकं तत्र प्राकृतिक–जलापूर्तिभण्डार उच्यते, खातश्च समृद्धधर्माचारिभिः राज्ञा वा निर्मापिताः कूपादयः। उपकूपः (आवाहः) वापी इत्यादयः प्रतिष्ठानन्तरं सार्वजनिकसंपत्तितया जनाः गृह्यन्ते, ते पेयजलरूपे कृषिकार्ये च सर्वसुलभाः भवन्ति। प्रायः सर्वेषु पुराणेषु धर्मशास्त्रे च तडागवापीकूपानां प्रतिष्ठाविधानं वर्णितमस्ति। 'दशकूपसमा वापी दशवापीसतो ह्रदः' [35] इति तेषामुद्घोषो भवति। कूपनिर्माणं धर्मकार्यमस्ति, कूपादपि महत्तरं वापीनिर्माणं ततोऽपि महत्तरं च ह्रदनिर्माणम्। यतोहि कूपस्य क्षमता यावज्जनेभ्यः जलापूर्तेः भवति, ततोऽधिका क्षमता वाप्याः भवति, ततोऽप्यधिकजनसंख्यात्मके क्षेत्रे ह्रदेन भवितुमर्हति। कौटिल्येन अर्थशास्त्रे जनसंख्यानुमानेन प्रतिक्षेत्रं कूपादिप्रतिष्ठार्थं निर्दिश्य द्वयोः कूपयोः मध्ये देशान्तरोपदेशः कृतः।3संस्कृतसाहित्ये पूर्तविधाने तडागादीनां खातविधानं प्रतिष्ठानविधानं (लोकार्पणम्) च विहितम्। [37] निष्कर्षतः वैदिकग्रथेषु संस्कृतवाङ्मये च उल्लिखितम् कृषिकार्येषु जलप्रबन्धनम् अत्र वर्तमानकालेऽपि प्रासंगिकमस्ति।

**आभारोक्ति :–**

प्रस्तुत शोधे ईश्वरकृत वेदानाम् प्राचीन ग्रन्थानाम् च ज्ञानं विभिन्नमाध्यमे प्रसारणम् अकुर्वन्। तेभ्यः वयं आजीवनं आभारी वर्तिष्यामहे।

**संदर्भ**

1. कन्यागुरूकुलमहाविद्यालयः, गुरूकुलकॉगड़ीविश्वविद्यालयः, हरिद्वाराम्, उत्तराखण्ड।
2. महाभारतसभापर्वणि – 5/77
3. पद्मपुराणे –'कूपारामतटाकाप्रतिष्ठा'
4. पद्मपुराणे –'कूपारामतटाकाप्रतिष्ठा' महाभारतसभापर्वाणि – 5/77
5. सामवेदे– 3/1/4/6
6. पद्मपुराणे सृष्टिखण्डे– 6/30–31
7. तदेव 61/104–105
8. अथर्ववेदे– 1/34/5
9. शुक्रनीतौ– 4/4/60
10. ब्रह्मपुराणे आदिसर्गे भूमिखण्डे
11. मैगस्थनीज– 1 पृष्ठे– 30
12. तैत्तिरीयसंहितायां – 51/7/3
13. नारदस्मृतौ–14/18
14. याज्ञवल्क्यस्मृतौ–2/156
15. कात्यायनस्मौ–762–763
16. ऋग्वेदे 7/110/3, 10/50/3, 10/105/3
17. तदेव 10/105/17,
18. तदेव 1/58/8, 10/25/4
19. तदेव 10/101/5–6
20. अथर्ववेदे 7/18/1
21. तदेव 7/18/1, 3/18/7
22. मनुस्मृतौ 7/248
23. बृहस्पतिस्मृतौ 1/62–63
24. त्वामेव हि प्रतीक्षन्ते पर्जन्यमिव कर्षकाः। वा0रा0 2/112/43, द्रष्टव्य– 2/32/13
25. तटाकैश्चोपशोभितः, तदेव 2/100/43
26. वा0रा0 2/80/1, यत्रका ।
27. ऋग्वेदे 7/110/3, 10/50/3, 10/105/3
28. तदेव 10/105/17,
29. तदेव 1/58/8, 10/25/4
30. तदेव 10/101/5–6
31. अथर्ववेदे 7/18/1
32. तदेव 7/18/1, 3/18/7
33. मनुस्मृतौ 7/248
34. 'अखातं देवखातकम्' अमरकोषे वारिवर्गे–28
35. मनुस्मृतौ
36. दशकुलीवाटं कूपस्थानम्– अर्थशास्त्रे 4/22/33
37. पद्मपुराणे –'कूपारामतटाकाप्रतिष्ठा'